अर्जुन उवाच । arjuna uvāca।

सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत।१.२१ line 2

senayorubhayormadhye ratham sthāpaya me'cyuta।।1.21 line 2

यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान्।
कैर्मया सह योद्धव्यं अस्मिन्रणसमुद्यमे।।१.२२

yāvadetān-nirīkśe'ham yoddhukāmānavasthitān।
kairmayā saha yodhavyam-asmin raṇasamudyame ।।

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः।
धार्तराष्ट्रस्य दुर्बुद्धेः युद्धे प्रियचिकीर्षवः।।१.२३

yotsyānānavekśe'ham ya ete'tra samāgatāh ।
dhārtarāśṭrasya durbuddheryudhhe priyacikīrśavah।।

संजय उवाच । sanjaya uvāca।

एवमुक्तो हृषीकेशो गुडाकेशेन भारत।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम्।।१.२४

evamukto hriśīkeṣo guḍākeṣena bhārata।
senayorubhayormadhye sthāpayitvā rathottamam।।

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्।
उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति।।१.२५

bhīśma-droṇa-pramukhatah sarveśām ca mahīkśitām।
uvāca pārtha paṣyaitān samavetān kurūniti।।

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान्।
आचार्यान्मातुलान्भ्रातॄन् पुत्रान्पौत्रान्सखींस्तथा।।१.२६

tatrāpaṣyat-sthitān-pārthāh pitrūnatha pitāmahān।
ācāryān mātulān bhrātrūn putrān pautrān sakhīmstathā।।

श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि।
तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान्।।१.२७

ṣvaṣurān suhridaṣcaiva senayorubhayorapi।
tān samīkśya sa kaunteyah sarvān bandhūnavasthitān।।

कृपया परयाविष्टो विषीदन्निदमब्रवीत्।१.२८ line 1

kripayā parayāviśṭo viśīdannidamabravīt। 1.28 line 1